# Avayavinirākaraṇa

By Aśoka

Funders: Deutsche Forschungsgemeinschaft and The National Endowment for the Humanities
Principal: Birgit Kellner
data entry by: Aurorachana, Auroville
prepared for SARIT by: Liudmila Olalde

## Edition Statement

## Publication Statement

Availability: restricted
Copyright Notice:
Copyright 2016 SARIT
SARIT assumes no responsibility for unauthorised use that infringes the rights of any copyright owners, known or unknown.

## Source Description

| | |
|---|---|
| Title: | Aśokanibandhau Avayavinirākaraṇaṃ Samānyadūṣaṇaṃ ca |
| Author: | Aśoka |
| Editor: | Anantalal Thakur |
| Publisher: | Kashi Prasad Jayaswal Research Institute |
| Place of Publication: | Patna |
| Date: | 1974 |
| Note: | The manuscript consulted by Thakur is described below. |

RatnakīrtinibandhaR [1]
Ratnakīrti
Ratnakīrtinibandha
Aśoka
Avayavinirākaraṇa
Aśoka
Sāmānyaduṣaṇa
Thakur had access only to photographs of the palm-leave manuscript.
The Avayavinirākaraṇa covers folios 78b1-82a5. The Sāmānyaduṣana covers folios 82a5-84b1. Both texts are placed between the Citrādvaitaprakāśavāda and the Santānāntaradūṣaṇa. The scribe is the same as in the Ratnakīrtinibandha. Each side of a folio consists of six lines of ca. 138 syllables. The inner four lines leave a gap of 12 syllables for two perforations in the palm-leaves. The script is proto-Maithili.
Photographs of manuscripts brought by Rahula Sankrityayana from Tibet discovered by Anantalal Thakur while editing the Ratnakīrtinibandhāvalī.

| | |
|---|---|
| Title: | Six Buddhist Nyāya Tracts in Sanskrit |
| Editor: | Mahāmahopadhyāya Haraprasād Shāstri |
| Publisher: | The Asiatic Society |
| Place of Publication: | Calcutta |
| Date: | 1910 |

## Encoding Description

In the source file, there were two types of line breaks: returns (and possible surrounding space) and hyphens+returns. These were replaced with lb-elements. The ed-attribute "tha" refers to Thakur's 1974 edition.
The folio numbers were encoded as pb-elements with the ed-attribute "msR", which refers to the manuscript used by Thakur.
Additions in square brackets were enclosed in a supplied-element.
Underlined items were enclosed in a hi rend="underline".
In the note-elements the lbs were removed.

1 This description is based on Thakur's introduction to his 1974 edition (pp. vii-viii).

The footnotes were encoded as note-elements with their corresponding n-attribute. The footnote references were replaced by the note-elements.

There was no footnote reference for note 2 on page 6. Hence it was given the attribute place="bottom".

## Revision Description

2016-05-31: Replaced add with supplied and updated the encoding description. By Liudmila Olalde

/p. 1/

# ॥ अवयविनिराकरणम् ॥

/p. 78b/

॥ नमो लोकनाथाय[1] ॥

अभ्यासातिशयस्तथा न विहितस्तादृक् श्रुतं नार्जितं
तन्मे चापलमर्थलेशमधुना निर्मातुमीहे यदि ।
एतत् सर्वमवेक्ष्य यन्निगदितं तत् पण्डितैर्दृश्यतां
प्रीणन्त्येव विचेष्टितानि[2] हि शिशोः प्रायः पितॄणां मनः ॥

यो विरुद्धधर्माध्यासवान् नासावेकः । यथा घटादिरर्थः । विरुद्धधर्माध्यासवांश्च स्थूलो नीलादिरर्थ इति व्यापकविरुद्धोपलब्धिः । इह[3] दृश्यमानः स्थूलो नीलादिरर्थो धर्मी । स चानुभवावसितोऽसति बाधके प्रत्यक्षसिद्धो हेतोराश्रयासिद्धिं निहन्ति ।

ननु भवद्भिरसन्नेवावयवी प्रतिज्न्ँआयते, स कथं प्रत्यक्षसिद्धः ? नावयविनमिह धर्मिणं प्रतिपन्नाः स्मः, किं तु प्रतिभासमानं स्थूलनीलादिकमर्थम् । न तर्हि विरुद्धधर्मसंसर्गादवयविन एकत्वं प्रतिषिद्धं[4] स्यात् ।

यद्येवं कस्तर्हि भवतोऽवयवी ? एकोऽनेकावयवसमवेतोऽर्थ इति चेत् ? स किं प्रतिभासमानात् स्थूलनीलादेरन्योऽनन्यो वा ? न तावदन्यः, दृश्यत्वेनाभ्युपगमात् । न च प्रतिभासमानस्थूलनीलार्थव्यतिरेकेणापरः प्रतिभाति । अनन्यश्चेत् ? तस्यैकत्वप्रतिक्षेपे कथमप्रतिषिद्धमेकत्वमवयविनः ?

ननु च प्रतिभासमानश्चेदर्थो नावयविरूपो धर्मी, किं तर्हि रूपमस्याविशिष्टं प्रसिद्धं[5] भविष्यतीति ? उच्यते । प्रतिभासमानः स्थूलो नीलाकारः प्रत्यक्षसिद्धं रूपम् अवयवित्वानभ्युपगमेऽप्यवशिष्यते । न चैवं मन्तव्यम् । न परमाणुसंचयवादिनां स्थूलाकारः कश्चिदर्थोऽस्ति, यः प्रसिद्धो धर्मी स्यादिति । अवयव्यनभ्युपगमेऽपि हि निरवयवानेकात्मकः स्थूलोऽर्थोऽभ्युपगम्यमानः केन निषिद्धः ?

/p. 2/

स्यान्मतम्, निरवयवाः परमाणवः कथं प्रत्यक्षे स्थूलेनाकारेणावभासेरन्, स्थूलसूक्ष्मयोर्विरोधादिति ? तदपि न युक्तम्, परमाणव एव हि पररूपदेशपरिहारेणोत्पन्नाः परस्परसहिता अवभासमाना देशवितानवन्तो भासन्ते । विततदेशत्वं च स्थूलत्वम् ।

यत् तूक्तम्, स्थूलसूक्ष्मयोर्विरोध इति, तत् किं पररूपदेशपरिहारवती निरवयवानामुत्पत्तिः, परस्परसहितानामेकविज्न्ँआनावभासित्वं[6] वाविरुद्धमिति वक्तुमध्यवसितम् ।

इदं चेदविरुद्धम्[7], स्थूलाकारः किं विरुद्धः ? अतएव निरवयवेषु बहुष्वेकस्मिन् विज्न्ँआने प्रतिभासमानेषु भवन् प्रतिभासकालभावी प्रतिभासधर्मः स्थूलाकारो न तु वास्तवः, प्रत्येकमभावात् । प्रतिभासात् प्राग् उर्ध्वं वा न तर्हि स्थूल इति चेत्--न, तदापि प्रतिभासयोग्यतासं /p. 79a/ भवात् । यदैव हि संचिता भवेयुः, तदैव प्रतिभासयोग्याः परमाणवः । यदा च प्रतिभासयोग्यास्तदा स्थूलाः ।

यस्त्वाह निरवयवेषु बहुषु प्रतिभासमानेष्ववश्यमन्तरेणापि प्रतिभासितव्यम् । अन्तरानवभासे परस्परविविक्ता एव नावभासिताः स्युः । विविक्तानवभासे चाणुमात्रकं पिण्डो भवेत् । न चान्तरमवभासमानमुत्पश्यामः । तदयं निरन्तर एक एव स्थूलो न[8] निरवयवानेकात्मको भवितुमर्हति, अपि त्वेकः स्थूलात्मक एवेति । सोऽप्येवं वाच्यः । किं विजातीयपरमाण्वन्तरमन्तरम्, आहोस्वित् शून्याकाशयोगः ? तत्र शून्याकाशयोगस्तावदवस्तुतया नेन्द्रियप्रत्यक्षगोचरः, अर्थसामर्थ्यभाविनि तत्रार्थस्यैव प्रतिभासोपपत्तेः । विजातीयं त्विन्द्रियान्तरग्राह्यं कथमिन्द्रियान्तरज्न्ँआने अवभासेत, अविषयत्वात् ? तत्र केनान्तरेणावभासितव्यमिति न विद्मः ।

---

1 नमः समन्तभद्राय S
2 चेष्टितानि S
3 °मानस्थूलो S
4 निषिद्धं S
5 °स्यावशिष्टप्रसिद्धं S
6 वा विरुद्धम् S
7 चेद् विरुद्धम् S
8 न omS

यत् पुनरुच्यते, अन्तरालानवभासे विविक्ता नावभासेरन्निति, तत्रापि किमेषामन्तरं विवेकः पररूपशून्यता वेति चिन्त्यम् । निरूपयन्तस्तु पररूपशून्यतामेव विवेकं वस्तूनां पश्यामः । पररूपशून्याश्चेमे भासमानाः कथं विविक्ता नावभासेरन्निति ?

/p. 3/

ननु च न प्रत्येकं परमाणूनां स्थूलाकारः, ततः समुदितानामेष्टव्यः । यथा च नीलपरमाणूनां प्रत्येकमसंभवन् पीताकारो बहुष्वपि न दृश्यते, तथा प्रत्येकमसंभवन् स्थूलाकारः कथं बहुषु स्यादिति ?

उक्तमत्र, अविरुद्धो निरवयवाणां स्थूलाकार इति । नीलविरुद्धस्तु पीताकारः । ततः पीतविरुद्धं नीलाकारं बिभ्राणेषु बहुष्वपि कथं पीताकारो भवेत् ? नैवं निरवयवत्वविरुद्धः स्थूलाकारः, यथोक्तन्यायात् । तदेवं प्रत्यक्षसिद्धः स्थूलोऽर्थ इह धर्मीति व्यवस्थितम् ।

तदेवं व्यवस्थिते[9] धर्मिणि हेतोः सत्त्वमसत्त्वं वा निरूप्य[10] तत्र पाण्यादावेकस्मिन् कम्पमाने स्थूलोऽर्थः सकम्पनिष्कम्पे रूपे युगपत् प्रतिपद्यमानः कथं विरुद्धधर्मसंसर्गवान् न स्यात् ? सकम्पनिष्कम्पयोर्हि रूपयोः परस्पराभावाव्यभिचारनिमित्तकोऽस्ति विरोधः । भावाभावयोरेव हि परस्परपरिहारात्मको विरोधः । वस्तुनोस्तु तदभावाव्यभिचारेणैव । इह च सकम्पनिष्कम्पे रूपे गृह्णत् प्रत्यक्षमेव सामर्थ्यात् परस्पराभावं साधयति । व्यवहारयति तु निर्विशेषणैवानुपलब्धिः ।

स्यादेतत् । पाण्यादावेकस्मिन्नवयवे कम्पमाने नावयविनः कम्प /p. 79b/ रूपमभ्युपेयम् । अवयव एव हि तदा क्रियावान् दृश्यते । न चेदं मन्तव्यम्, अवयवे क्रियावति तदाधेयेनावयविनापि क्रियावता भवितव्यम्, यथा रथे चलति तदारुढोऽपि चलतीति । अवयवावयविकर्मणोर्भिन्ननिमित्तत्वात्, निमित्तायौगपद्याच्च ।

यदा हि आत्मनः पाणिकम्पनेच्छा भवति, ततः प्रयत्नः, तदा प्रयत्नवदात्मपाणिसंयोगात् पाणौ क्रिया । यदा तु शरीरकम्पनार्थः प्रयत्नविशेष आत्मनो जायते, तदा तत्प्रयत्नवदात्मशरीरसंयोगात् शरीरे कर्मेति निमित्तभेदः । अतो[11] भिन्ननिमित्तयोरेकस्मिन् जाते कथं निमित्तान्तरप्रतिबद्धजन्मा तदभावे तदपरोऽपि तथैव जायेत ? रथतदारुढकर्मणोस्तु सत्यपि निमित्तभेदे निमित्तयौगपद्यात् सहभावः ।

तथा हि नोदनं रथकर्मणीऽसमवायिकारणम्, तदारुढकर्मणस्तु नोद्यसंयोगः । तयोश्च सहभावात् कर्मणी अपि यौगपद्येन जायेते । तदेतत् /p. 4/ सकलमालोच्य भदन्तधर्मोत्तरेण इदमुक्तम्--न चात्रावयवः क्रियावान् । अवयवेषु हि क्रियावस्तु विभागो जायते, क्रियाया विभागारम्भं प्रति निरपेक्षकारणत्वात् । तेन च संयोगेऽसमवायिकारणे[12] निवर्तिते निवर्तेतावयविद्रव्यमिति ।

इदमाहुरत्र कणादशिष्याः--नोदनादभिघाताद्[13] वा जायमानः क्रियाविशेषो द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागारम्भको दृष्टः । अन्यत् तु विभागमात्रमारभते, न तु यथोक्तविशेषम् । अन्यस्मिन् पद्मसंकोचविकाशादिके कर्मणि अवयवसंयोगनिवृत्तेरदर्शनात् । तद्वत् प्रयत्नजन्यस्यापि कर्मणो नास्ति संयोगनिवर्तनसामर्थ्यम् । ततो नास्ति द्रव्यनिवृत्तिरिति ।

अयमत्र समाधिः । इहावयविनि क्रियावति नियमेनावयवैरपि क्रियावद्भिर्भवितव्यम् । अन्यथावयवसंसृष्टेभ्य आकाशदेशेभ्यो विभागोऽवयवासंसृष्टैश्च संयोगोऽवयविनः क्रियावतः स्यात् । अवयवास्तु क्रियाविरहिणः पूर्वाक्रान्तेभ्यो नभोदेशेभ्यो नापसर्पेयुः । अवयविसमाक्रान्तैश्च देशैर्नाभिसंबध्येरन् ।

न चावयविसंयोगविभागाभ्यामवयवसंयोगविभागौ वाच्यौ, कार्यसंयोगविभागयोः कारणसंयोगविभागौ प्रति निमित्तभावानभ्युपगमात् । कारणसंयोगविभागावेव हि कार्यसंयोगविभागावारभेते ।

न च विपर्ययः, सिद्धान्तहानिप्रसङ्गात् । तेनावयवावयविनां पृथग्देशत्वात् /p. 80a/ आधार्याधारभावहानौ समवायोऽपि न व्यवतिष्ठेत । तस्माद् अवयविनि क्रियावति अवयवाः क्रियावन्तः इत्यकामकैरपि वैशेषिकैः इदमभ्युपेयम् । यथा चावयविक्रियायामवयवाः क्रियावन्तः, तथा अवयवेष्वपि क्रियावत्सु तदवयवैः क्रियावद्भिर्भाव्यमिति । अनया दिशा द्व्यणुके क्रियावति तदारम्भकौ परमाणू क्रियावन्तौ मन्तव्यौ ।

अतश्चलावयवसंबन्धिनश्चलाः परमाणवः । निष्क्रियावयवसंबन्धिनस्तु निष्क्रियाः । परमाणुक्रियायां तदारब्धमपि द्व्यणुकद्रव्यं क्रियावत् प्रसज्येत, सर्वावयवक्रियायाः कार्यक्रियाविनाभूतत्वात् ।

/p. 5/

एकस्य परमाणोः क्रिया न परस्येति चेत् ? सक्रियनिष्क्रियौ तर्हि परमाणू परस्परं विभज्यमानावुज्झितद्रव्यारम्भकसंयोगौ स्याताम् । ततश्च द्रव्यनाशः । एवं च द्व्यणुकद्रव्यस्य क्रियावत्त्वे त्र्यणुकेऽपि क्रिया स्यादित्यनेन क्रमेण परिदृश्यमानोऽचलश्चलः स्यादवयवः । तस्मात् निष्क्रियावयवसंबन्धिनो निष्क्रियाः परमाणवः चलावयवसंबन्धिभ्यश्चलेभ्यो विभज्यमाना द्रव्यारम्भकसंयोगविनाशवन्तः स्युः । निरवयवो हि परमाणुर्यमणुमात्रनभोदेशमाक्रम्य परमाण्वन्तरेण संयुज्यते, ततो विभज्यमानः कथमनुज्झितपरमाण्वन्तरप्रत्यासत्तिकः स्यात् ? सावयवो हि

---

9 तदेवमवस्थिते S
10 निरूप्यम् S
11 भिन्नमिति तयोः S
12 निवर्तते S
13 °दविघाताद्वा R

भाव एकेनावयवेन वस्त्वन्तरसंयुक्त एवावयवान्तरैश्चलैः पूर्वाक्रान्तान् नभोदेशान् विरहय्य देशान्तरमाक्रामेत् । निरवयवेषु त्वत्यन्तमस्तमितेयं कथेति युक्तं द्रव्यनाशप्रसङ्गम् उत्पश्यामः ।

अथ वान्यथायं विरुद्धधर्मसंसर्गः । तथा ह्यावृते एकस्मिन् पाण्यादौ स्थूलस्यावृतानावृते रूपे युगपदुद्भवन्ती विरुद्धधर्मद्वयसंयोगमस्यावेदयतः । न चानावृतैकरूप एवायमिति शक्यं वक्तुम्, अर्द्धावरणेऽपि अनावृतस्य पूर्ववद् दर्शनप्रसङ्गात् ।

[14] तदवयवदर्शनायत्तोपलब्धेः तदट्टष्टावस्याट्टष्टिरिति चेत् ? अट्टष्टिरेव तर्हि अस्यास्तु, न तु दृष्ट्यट्टष्टी ।

नन्वस्त्येवावयविदर्शनमवयवावरणेऽपीति कोऽयं प्रसङ्गः ? एवं तर्हि स्थूलः प्राग्वदुपलभ्येत ।

इदमत्राह कश्चित् । भूयोऽवयवेन्द्रियसन्निकर्षसहायोऽवयवीन्द्रियसन्निकर्षः स्थूलोपलब्धेर्निमित्तम् । न चार्द्धावरणे भूयसामवयवानामस्तीन्द्रियसन्निकर्षः । ततो न स्थूलग्रहणमिति ।

सोऽप्येवं प्रष्टव्यः । किं स्थूलो नामावयविनोऽन्यः ? स एव वानेकव्यापी स्थूलः ? तत्र यद्यवयव्येव स्थूलः, तदा /p. 80b/ तद्ग्रहणे कथं न स्थूलग्रहणमिति चिन्त्यम् ।

अथ स्थूलत्वाख्यः परिमाणविशेषो गुणः, [15] स च द्रव्यादन्य एवेति चेत् ? एवं तर्हि परिमाणरहितमेतद् [16] द्रव्यमुपलभ्यते । न त्वस्यान्येनान्येन /p. 6/ परिमाणेन योगः । न चास्यानेकपरिमाणकल्पनापि साध्वी, युगपत् सर्वेषामनुपलब्धेः । न च [17] दृश्यस्य दर्शननिवृत्तिर्युक्ता ।

अवयवस्यैव तत् परिमाणमुपलभ्यत इति चेत् ? यद्येवं स एव तर्हि अवयवः स्वेन परिमाणेन संबद्धः प्रत्यक्षोऽस्त्वावरणकाले नावयवी ।

स्यादेतत् । एकार्थसमवायाद् भ्रान्तिनिमित्तादवयव्येवावयवपरिमानेन संबद्धः प्रतिभातीति, तदपि न शोभनम् । द्वयोः समपरिमाणयोरवयवावयविनोः प्रतिभासप्रसङ्गः । यस्य हि महतोऽवयवस्य तत् परिमाणम्, स तावत् स्वेन परिमाणेन संबद्धः प्रतिभाति । अवयविनश्च तत्परिमाणसंबन्धप्रतिभासाभ्युपगमे द्वयोः समपरिमाणयोरवयवावयविनोः प्रतिभास आसज्यते ।

न चास्ति यथोक्तः प्रतिभासः । परिमाणरहितः सोऽवयवः प्रतिभासत इति चेत् ? स्यादेतत् । यस्यावयवस्य परिमाणेनावयवी संबद्धः प्रतिभाति स स्वं परिमाणं परित्यज्याभातीति । इदमपि परिमाणविरहिणोऽवयवस्याट्टष्टेरशक्यं कल्पयितुम् । एकार्थसमवायाच्च भ्रान्तिनिमित्तादल्पतरावयवपरिमाणवानप्यवयवी प्रतिभासेत । न च बाधकमन्तरेण भ्रान्तिरपि शक्या व्यवस्थापयितुम् ।

अस्तु तर्हि स्थूलोऽवयव एव प्रत्यक्षः । [18] एवमावरणकाले इवानावरणावस्थायामपि स्थूलतरोऽवयवः प्रत्यक्षोऽस्तु, परमध्यवर्तिनामवयवानामिन्द्रियसन्निकर्षाभावे स्थूलतमावयविदर्शनानुपपत्तेः । स्यान्मतं निखिलावयवदर्शन न स्थूलप्रत्यक्षकारणम्, किं तु भूयोऽवयवदर्शनमिति ।

इदमपि न सम्यक् । अभिमुखावस्थितस्य हि पर्वतादेरर्वाचीनावयवदर्शने न तथा स्थूलप्रतिपत्तिः, यथा अर्वाक्परमध्यवर्तिनां दर्शने । ततो न यावत् निरवशेषावयवदर्शनम्, तावत् कथं स्थूलतमार्थप्रतिपत्तिः स्यात् ? न चावयवा अर्वाक्परमध्यवर्तिनो युगपद् दृश्यन्ते । तत् कथमवयवी स्थूलो दृश्येत ?

क्रमेण दिशामवयवानां प्रत्यक्षीकरणे प्रत्यक्षः स्थूलोऽवयवीति चेत् ? अन्यदा तु कः प्रत्यक्ष इति विमृष्यम् । अवयव इति चेत् ? अवयवा [19] /p. 7/ अपि परमध्यवर्तिनो न युगपद् दृश्यन्त इति कथं सोऽपि प्रत्यक्षः स्यात् ? तदेवं नावयवी नावयवाः प्रत्यक्षा इति न किन्ँचिद् दृश्येतेति । तत् /p. 81a/ सिद्धमावृतानावृतरूपः स्थूलोऽर्थ इति ।

तथा रागारागाभ्यां विरोधः संभावनीयः । तथा ह्येकस्मिन् [20] रक्ते स्थूलोऽर्थो रक्तारक्ते रूपे युगपत् प्रतिपद्यमानो विरुद्धरूपद्वययोगमात्मनः प्रकाशयति । ननु अवयव एव रक्तोऽवयवी त्वरक्तैकरूप एवेति । यद्येवं रक्तेऽवयवेऽरक्तरूपोऽवयवी दृश्येत । न चैवम् । अथ वा रागद्रव्यसंयोगो हि रक्तत्वम् । अवयवस्य च रागद्रव्येण संयोगेऽवयविनोऽपि तेन भाव्यम्, अवश्यं हि कारणसंयोगिना कार्यमपि संयुज्यत इति समयात् ।

यस्त्वाह--रक्त एवावयवी । अस्ति हि कुङ्कुमारक्ते पटावयवे कुङ्कुमारक्तः पट इति प्रत्ययः । ततो रागद्रव्यसंयुक्त एवावयवीति तस्यापि वर्णान्तरानवभासः स्यादवयविनः । रागद्रव्यं हि प्रत्यासीदत् निजरूपं वस्तुनस्तिरोधत्ते । स्वेन च रूपेण द्रव्यं संबध्नाति । यथा रक्तोऽवयवः तिरोहितसहजरूपो रागद्रव्यसमवायिना रूपेण संबन्धी प्रतिभाति । अवयविन्यपि रागद्रव्यसंयोगिनि वर्णान्तरानवभासप्रसङ्गो दुर्वारः । तन्न रक्त एवावयवीति शक्यं वक्तुम् ।

---

14 तत् om S
15 स द्रव्या° S
16 °मेव तत् S
17 दर्शनस्य R
18 एवमनाव° R
19 प्रतिभास इति S
20 उक्ते S

अन्यस्तु संयोगस्याव्याप्यवृत्त्या समाधत्ते । स ह्याह, शब्द इवाव्याप्यवृत्तिः संयोगः । तेनैकार्थो रक्तश्चारक्तश्च । सोऽप्येवं पर्यनुयोज्यः, कथमव्याप्यवृत्तिः ? यदि हि स्वाश्रये समवेतो रूपादिवद् व्याप्यवृत्तिरेवायम्, असमवेतश्चावृत्तिरेवाप्यद्रव्येष्विव गन्धः ।

एकत्र संयोगस्य भावाभावाव्यापिनी [21] वृत्तिरिति चेत् ? स्यादेतत् । यथा विरुद्धावपि रूपरसावेकमाश्रयेते, तथा संयोगस्याप्येकत्र भावाभावौ युगपत् स्याताम् ।

अहो मोहविजृम्भितम् । अभावो हि भावनिवृत्तिरूपः, नास्य भावनिवृत्तिं हित्वा रूपान्तरमीक्ष्यते । यश्च यन्निवृत्तिरूपः स कथं तस्मिन् सत्येव भवति, भावे वा तन्निवृत्तिरूपतां जह्यात् ? तथा हि अनलं पश्यन्नपि सलिलार्थी तत्र प्रवर्तेत । जलविविक्तस्यानलस्य दर्शनात्, जलाभावसिद्धेः /p. 8/ अप्रवृत्तिरिति चेत् ? भवतु अनुपलम्भात् जलाभावसिद्धिः, तथापि जलसत्तां संभावयन् जलार्थी प्रवर्तेत ।

ननु तत्र यदि जलं स्यात्, उपलभ्येत । किमतः ? अतोऽनुपलम्भाद् अभावो जलस्येति । यद्यप्यभ्युपगतैव जलाभावसिद्धिः, तथापि तदर्थिनस्तद्भावशङ्कया प्रवृत्तिः स्यात् । युगपदेकत्र संयोगस्य भावाभावौ दृश्येते । तेनैवं कल्पयामो न स्वेच्छया ।

ननु किमभावो भावप्रतिषेधात्मकः प्रतीयते, अन्यथा वा ? तत्र भावनिवृत्तिरूपे /p. 81b/ ऽभावे सिद्धे कथं भावोपलब्धिर्न भ्रान्ता स्यात् ? भावाप्रतिषेधात्मकश्च नाभावः । नाममात्रं तु स्यात् । न च नाममात्रादर्थस्य तथाभावः । रूपरसयोस्तु न परस्परनिवृत्ती रूपमिति कथं तदुदाहरणमिह शोभेत ? न च रूपरसयोरेकत्र समवायोऽस्माभिरनुमन्यते । शब्दोऽप्येवमेवाव्याप्यवृत्तिरसिद्धः । स कथं प्रकृतसंशयनिवृत्तये कल्प्येतेति ? अलं बहुलापितया [22] ।

अथ वा स्थूलोऽर्थस्तदतद्देशः [23] प्रतीयते । [24] तदतद्देशयोश्च परस्पराभावाव्यभिचारनिमित्तोऽस्ति विरोधः । अतो विरुद्धधर्मसंसर्गः स्थूलस्य ।

स्यादेतत् । कथं तदतद्देशयोः परस्पराभावाव्यभिचारः ? उच्यते, इह तावदेकस्मिन् देशे परिच्छिद्यमाने ताद्रूप्यप्रच्युतिरस्य व्यवच्छिद्यते, तदव्यवच्छेदे तत्परिच्छेदाभावप्रसक्तेः । प्रच्युतिवच्च प्रच्युतिमदपि देशान्तरं व्यवच्छिद्यते । यदि हि परिच्छिद्यमानो देशान्तरस्वभावो भवेत्, तदा तद्रूप एवोपलभ्यो भवेत् । देशान्तररूपं तु विरहय्य स्वेन रूपेण प्रकाशमानो देशो देशान्तरासंसृष्ट इत्यवसीयते । यथा च देशस्य देशान्तरासंसर्गः, तथा तेनाधारभूतेन देशेन यद् व्याप्तं रूपं तदपि देशान्तरसंसर्गादवच्छिन्नं [25] भवति । कथं हि तेन देशेन व्याप्तं रूपं तदभाववति देशान्तरे वर्तेत, यथा एकेन देशेन व्याप्तो घटो न देशान्तरे वर्तते ?

देशान्तरेऽनुपलम्भादप्रवृत्तिरिति चेत् ? विप्रकृष्टे देशान्तरे कथमस्याभावः प्रतिपत्तव्यः ? तस्मादिदमकामकेनापि वाच्यम्, यदुत एकदेशव्याप्तं रूपं न देशान्तरे वर्तत इति, तस्य तेन व्यापनप्रसङ्गात् ।

/p. 9/

तदभावति देशान्तरे वर्तमानोऽपि तेन देशेन व्याप्येत । न च व्याप्तिरस्य शक्यावसातुम्, भागान्तरासंभवात् ।

एतेन तन्निरस्तं यदाह कश्चित्--यथैको भावस्तदतद्देशं जनयन्न विरुध्यत इति, तदपि न प्रकृतानुरूपम् । तथा हि भावाभावावेव [26] परस्परपरिहारेण विरुद्धौ न वस्तुनी । वस्तुनोस्तु परस्पराभावाव्यभिचारेण विरोधः । तेन यदेव वस्तु वस्त्वन्तरप्रच्युतिमत्, तदेव तेन विरुद्धम् ।

न चैककार्यनिर्वर्तनशक्तिः कार्यान्तरशक्त्यभावाव्यभिचारिणी । अनुपलम्भो हि वस्तुनो वस्त्वन्तराभावाव्यभिचारं साधयति । एककार्यनिर्वर्तनशक्तिमति च रूपे गृह्यमाणे कार्यान्तरनिर्वर्त्तनशक्तिरपि परिच्छिद्यत इति कथं तदभावः ? एकदेशसंबद्धं तु रूपं देशान्तरसंसर्गिरूपपरिहारेणोपलभ्यमानं [27] तदभावाव्यभिचारि तेन विरुद्धम् । यथात्यन्तसदृशोर्वस्तुनोर्युगपद् /p. 82a/ उपलभ्यमानयोः सत्यपि [28] चाकारभेदे दूरादनुपलक्ष्यमाणभेदयोर्देशभेदमात्रनिमित्तकं प्रत्यक्षावसितं [29] विरोधमाश्रित्य भेदोऽवस्थाप्यते ।

यस्त्वाह--यथैकं चक्षुर्विज्न्ँआनं भिन्नेषु चक्षुरादिषु वर्तते तदधीनोत्पादतया, तथान्योऽपि [30] भिन्नदेशनिवृत्तिर्न भेत्स्यत इति, सोऽपि देशभेदनिमित्ते विरोधे अवस्थाप्यमाने वस्तुनः कारणभेदनिमित्तं विरोधमासन्ँजयन् न नैपुण्यमात्मनो निवेदयति । न हि विज्न्ँआनस्य देशोऽस्ति कश्चित्, अमूर्तत्वात् ।

स्यादेतत् । यथा देशभेदनिमित्तो विरोधः, तथा कारणभेदनिमित्तोऽपि स्यात् । को हि वस्तुतो विशेषः कारणभेदाद् देशभेदस्येति ?

---

21 °व्यापिनो S
22 °भाषितया S
23 तद्देशः R
24 °तद्देशयो° S
25 °दविच्छिन्नं S°द् विच्छिन्नं ?
26 एव omR
27 भाव्यचारितुं सच्च विरुद्धम् R
28 चाकाराभेदे R
29 प्रत्यक्षाश्रितं R
30 देशवृत्ति° ?

उक्तमिह । परस्पराभावाव्यभिचारनिमित्तो वस्तूनामस्ति विरोधः । स देशभेदे[31] संनिधीयते, न कारणभेदे । देशभेदवती हि रूपेऽन्योन्यपरिहारेणोपलभ्यमाने परस्पराभावाव्यभिचारिणी भवतो न कारणभेदवती ।

/p. 10/

तदेवं कम्परागावरणभावाभावकृते देशभेदनिबन्धने च चतुर्थे विरुद्धधर्मसंसर्गेऽवयविविषये व्यवस्थापिते पक्षधर्मत्वं सिद्धं हेतोः । अधुना व्याप्तिरेवास्य स्वसाध्येन समर्थनीया ।

इह विरुद्धधर्मसंसर्गविरहमात्रनिबन्धनोऽभेदव्यवहारो वस्तूनां दृष्टः अहेतोरयोगात्, निमित्तान्तरस्य चादर्शनात् । ततो विरुद्धधर्मसंसर्गेऽपि भवन्नभेदव्यवहारो व्यापकं[32] निमित्तत्वं जह्यात् । ततो व्यापकानुपलब्ध्या तस्माद् व्यावृत्तो[33] विरुद्धधर्मविरहेण व्याप्यते । तद्विरुद्धश्च विरुद्धधर्मसंसर्गः । तेनेयं व्यापकविरुद्धोपलब्धिभूमिका ।

एवं प्रसाधितेऽस्यास्त्रैरूप्येऽसिद्धविरुद्धानैकान्तिका दोषा नावकाशं लभन्त इति ।

एवं मया बहुषु दुर्मतिनिर्मितेषु
प्रत्युद्धृतेषु खलु दूषणकण्टकेषु ।
आचार्यनीतिपथ एव विशोधितोऽय-
मुत्सार्य मत्सरमनेन जनः प्रयातु ॥

॥ समाप्तं चेदमवयविनिराकरणमिति ॥

---

31 देशभेदेऽपि S
32 निमित्तवत्त्वं S
33 तस्माद् व्या° om R